# Rashtrabharati Bhavatu Samskritam

# રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્

## Document Information

Text title : Rashtrabharati Bhavatu Samskritam

File name : rAShTrabhAratIbhavatusaMskRRitam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Transliterated by : Swaroop Bhagwat

Proofread by : Swaroop Bhagwat

Description/comments : From Loka Sanskritam magazine May 1991

Latest update : March 19, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2023

*sanskritdocuments.org*

# રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્

રાષ્ટ્રભારતી ભવતુ સંસ્કૃતં
લોકભારતી ભવતુ સંસ્કૃતમ્ ॥ ધ્રુવમ્ ॥

રાષ્ટ્રભારતી ભવતુ સંસ્કૃતં
સર્વાસાં વાચાં જનયિત્રી
ભારતીયભાવનાસવિત્રી
લોકમઙ્ગલં દિશતુ સંસ્કૃતં
રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્ ॥ ૧॥

વેદપુરાણોપનિષલ્લીનં
કાલિદાસકવિતારસપીનં
નિખિલભારતં પઠતુ સંસ્કૃતં
રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્ ॥ ૨॥

રાષ્ટ્રિય પશુઃ કેસરી ઘુષ્ટઃ
ગૃહે ગૃહે તત્ કિમસો દૃષ્ટઃ
મહિમાનં ઘોષયતુ સંસ્કૃતં
રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્ ॥ ૩॥

સંસ્કૃતમખિલભારતીમૂલં
અપનેષ્યતિ નૂનં હૃચ્છૂલં
હૃન્દિ હૃદા બધ્નાતુ સંસ્કૃતં
રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્ ॥ ૪॥

ભવતુ સંસ્કૃતં રાષ્ટ્રિયભાષા
નૂનમુદેષ્યતિ સહગમનાશા
નવરાષ્ટ્રં વિદધાતુ સંસ્કૃતં
રાષ્ટ્રભારતી ભવતુ સંસ્કૃતમ્ ॥ ૫॥

રચના - મિશ્રોઽભિરાજરાજેન્દ્રઃ

(હૃન્દિ - હૃદયાનિ । હૃદા - હૃદયેન ।)

અભિરાજરાજેન્દ્રમહોદયેન તથ્યમેવ પ્રકાશિતં અસ્યાં સુન્દરકવિતાયામ્ ।
“હિન્દીભાષા હિન્દીભાષિપ્રદેશસ્ય અર્થે એવ સાધુઃ, ન તુ
સમગ્રભારતસ્ય અર્થે । સંસ્કૃતમેવ ભારતીયાનાં અર્થે શ્રેયસ્કરમ્ ।”
ભારતસ્ય ઐક્યસંરક્ષણે ભાષાસમસ્યાયાઃ સમાધાને ચ
સંસ્કૃતમેવ અનન્યસાધનમ્ । કવિવરેણ શ્રીમાતુઃ સંસ્કૃત વિષયકાઃ
અભિપ્રાયાઃ અત્ર સુષ્ઠુ અભિવ્યઞ્જિતાઃ । અભિનન્દામઃ તં વયમ્ ।
- સમ્પાદકઃ લોકસંસ્કૃતમ્, ૧૯૯૧ ॥

Encoded and proodread by Swaroop Bhagwat

*Rashtrabharati Bhavatu Samskritam*
pdf was typeset on March 19, 2023

Please send corrections to *sanskrit@cheerful.com*